# Renuka Stotram Muchukunda kritam

# રેણુકાસ્તોત્રં મુચુકુન્દકૃતમ્

## Document Information

Text title : reNukAstotraM muchukundakRitam skandapurANe reNukAkhaNDe

File name : reNukAstotrammuchukubdaskanda.itx

Category : devii, reNukA, devI

Location : doc_devii

Author : Vinayaka Shastri Vetala

Transliterated by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Description-comments : Skandapurana Runukakhanda

Latest update : June 13, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# રેણુકાસ્તોત્રં મુચુકુન્દકૃતમ્

શ્રીગણેશાય નમઃ ।

મુચુકુન્દ ઉવાચ

અનાથમકૃતપ્રજ્ઞં અજ્ઞાનતિમિરાવૃતમ્ ।
મોહપઙ્કનિમગ્નઞ્ચ મામુદ્ધર સુરેશ્વરિ ॥

ત્વાં રેણુકેતિ વરદેતિ ચ સુન્દરીતિ
વાગીશ્વરીતિ સકલેતિ ચ પાર્વતીતિ ।
સિદ્ધેશ્વરીતિ સુભગેતિ ચ યે વદન્તિ
તાન્ દેવિ નિત્યમનઘાન્ પરિપાલય ત્વમ્ ॥

અમ્બેતિ વિશ્વજનનીતિ જગદ્ધિતેતિ
વિદ્યેતિ ધર્મનિરતેતિ પરાત્પરેતિ ।
આદ્યેતિ વેદજનનીતિ ચ યે વદન્તિ
તાન્ દેવિ નિત્યમનઘાન્ પરિપાલય ત્વમ્ ॥

ત્વાં વેદશાસ્ત્રમિતિહાસવિનોદિનીતિ
બ્રહ્મેતિ બ્રહ્મગમકેતિ શુભાવહેતિ ।
વિશ્વેશ્વરીતિ કમલેતિ ચ યે વદન્તિ
તાન્ દેવિ નિત્યમનઘાન્ પરિપાલય ત્વમ્ ॥

આનન્દભૂતનિલયેત્યનલોદ્ભવેતિ
ગૂઢેતિ ભાવગમકેતિ શુભાવહેતિ ।
વિશ્વેશ્વરીતિ કમલેતિ ચ યે વદન્તિ
તાન્ દેવિ નિત્યમનઘાન્ પરિપાલય ત્વમ્ ॥

નિત્યેતિ દિવ્યચરણેતિ મહાવ્રતેતિ
હૃદ્યેતિ ભક્તજનદુઃખવિનાશિનીતિ ।
શ્રદ્ધેતિ રામજનનીતિ ચ યે વદન્તિ

તાન્ દેવિ નિત્યમનધાન્ પરિપાલય ત્વમ્ ॥

ત્વાં પુણ્યદેતિ જમદગ્નિ-ઋષિપ્રિયેતિ
ગઙ્ગેતિ તત્ત્વવિહિતેતિ પરાપરેતિ ।
સુધ્દેતિ પાતકકદમ્બકુઠારકેતિ
તાન્ દેવિ નિત્યમનધાન્ પરિપાલય ત્વમ્ ॥

ત્વાં રાજનીતિ પરમામૃતભોજનેતિ
શ ृङ્ગારમુખ્યનવષટ્ ચ રસપ્રિયેતિ ।
લક્ષ્મીપ્રદેતિ સુમુખેતિ ચ યે વદન્તિ
તાન્ દેવિ નિત્યમનધાન્ પરિપાલય ત્વમ્ ॥

સ્કન્દ ઉવાચ

સ્તુતૈવં મુચુકુન્દેન રેણુકા બ્રહ્મરૂપિણી ।
પ્રત્યક્ષરૂપા પ્રાહેદં  પ્રસન્નાહં મુનીશ્વર ॥

દેવ્યુવાચ

મુચુકુન્દ ત્વયા તુલ્યઃ કશ્ચિદ્ભક્તો ન વિદ્યતે ।
કિં પ્રાર્થયસિ મત્તસ્ત્વં બ્રૂહિ યત્તેઽભિવાઞ્છિતમ્ ॥

મુચુકુન્દ ઉવાચ

ત્વદ્ભક્તિમતુલાં દેહિ દેવિ ત્વં વિશ્વરૂપિણી ।
નાન્યદિચ્છામ્યહં માતઃ સત્યમેતન્મયોદિતમ્ ॥

આત્મનઃ સ્વં પરં બ્રહ્મસ્વરૂપં દર્શયસ્વ મે ।
યદિ તુષ્ટાસિ દાસસ્ય કૃપયા ત્વં મમોપરિ ॥

ઇતિ શ્રીસ્કન્દમહાપુરાણે રેણુકામાહાત્મ્યે
શ્રીરેણુકાસ્તોત્રં મુચુકુન્દકૃતમ્ ॥

Encoded by Kaushal S. Kaloo kaushalskaloo at gmail.com

*Renuka Stotram Muchukunda kritam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*